শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে

# ॥ পঞ্চপঞ্চাশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ পঞ্চপঞ্চাশঃ সর্গঃ ॥

## সীতাৱিনাশাশঙ্কযা হনুমতশ্চিন্তা তস্যা নিৱারণং চ

সন্দীপ্যমানাং ৱিত্রস্তাং ত্রস্তরক্ষোগণাং পুরীম্।
অৱেক্ষ্য হনুমান্ লঙ্কাং চিন্তযামাস ৱানরঃ॥ **5.55.1** ॥

তস্যাভূৎ সুমহাংস্ত্রাসঃ কুৎসা চাত্মন্যজাযত।
লঙ্কাং প্রদহতা কর্ম কিংস্ৱিৎ কৃতমিদং মযা॥ **5.55.2** ॥

ধন্যাঃ খলু মহাত্মানো যে বুদ্ধ্যা কোপমুত্থিতম্।
নিরুন্ধন্তি মহাত্মানো দীপ্তমগ্নিমিৱাম্ভসা॥ **5.55.3** ॥

ক্রুদ্ধঃ পাপং ন কুর্যাৎ কঃ ক্রুদ্ধো হন্যাদ্ গুরূনপি।
ক্রুদ্ধঃ পরুষযা ৱাচা নরঃ সাধূনধিক্ষিপেৎ॥ **5.55.4** ॥

ৱাচ্যাৱাচ্যং প্রকুপিতো ন ৱিজানাতি কর্হিচিৎ।
নাকার্যমস্তি ক্রুদ্ধস্য নাৱাচ্যং ৱিদ্যতে ক্ৱচিৎ॥ **5.55.5** ॥

যঃ সমুৎপতিতং ক্রোধং ক্ষমযৈৱ নিরস্যতি।
যথোরগস্ত্ৱচং জীর্ণাং স ৱৈ পুরুষ উচ্যতে॥ **5.55.6** ॥

ধিগস্তু মাং সুদুর্বুদ্ধিং নির্লজ্জং পাপকৃত্তমম্।
অচিন্তযিৎৱা তাং সীতামগ্নিদং স্ৱামিঘাতকম্॥ **5.55.7** ॥

যদি দগ্ধা ৎৱিযং সর্ৱা নূনমার্যাপি জানকী।
দগ্ধা তেন মযা ভর্তুর্হতং কার্যমজানতা॥ **5.55.8** ॥

যদর্থমযমারম্ভস্তৎকার্যমৱসাদিতম্।
মযা হি দহতা লঙ্কাং ন সীতা পরিরক্ষিতা॥ **5.55.9**॥

ঈষৎকার্যমিদং কার্যং কৃতমাসীন্ন সংশযঃ।
তস্য ক্রোধাভিভূতেন মযা মূলক্ষযঃ কৃতঃ॥ **5.55.10**॥

ৱিনষ্টা জানকী ৱ্যক্তং ন হ্যদগ্ধঃ প্রদৃশ্যতে।
লঙ্কাযাঃ কশ্চিদুদ্দেশঃ সর্ৱা ভস্মীকৃতা পুরী॥ **5.55.11**॥

যদি তদ্ৱিহতং কার্যং মযা প্রজ্ঞাৱিপর্যযাৎ।
ইহৈৱ প্রাণসংন্যাসো মমাপি হ্যদ্য রোচতে॥ **5.55.12**॥

কিমগ্নৌ নিপতাম্যদ্য আহোস্ৱিদ্ ৱডৱামুখে।
শরীরমিহ সত্ত্ৱানাং দদ্মি সাগরৱাসিনাম্॥ **5.55.13**॥

কথং নু জীৱতা শক্যো মযা দ্রষ্টুং হরীশ্ৱরঃ।
তৌ ৱা পুরুষশার্দূলৌ কার্যসর্ৱস্ৱঘাতিনা॥ **5.55.14**॥

মযা খলু তদেৱেদং রোষদোষাৎ প্রদর্শিতম্।
প্রথিতং ত্রিষু লোকেষু কপিৎৱমনৱস্থিতম্॥ **5.55.15**॥

ধিগস্তু রাজসং ভাৱমনীশমনৱস্থিতম্।
ঈশ্ৱরেণাপি যদ্ রাগান্মযা সীতা ন রক্ষিতা॥ **5.55.16**॥

ৱিনষ্টাযাং তু সীতাযাং তাৱুভৌ ৱিনশিষ্যতঃ।
তযোর্ৱিনাশে সুগ্রীৱঃ সবন্ধুর্ৱিনশিষ্যতি॥ **5.55.17**॥

এতদেৱ ৱচঃ শ্রুৎৱা ভরতো ভ্রাতৃৱৎসলঃ।
ধর্মাত্মা সহশত্রুঘ্নঃ কথং শক্ষ্যতি জীৱিতুম্॥ **5.55.18**॥

ইক্ষ্ৱাকুৱংশে ধর্মিষ্ঠে গতে নাশমসংশযম্।
ভৱিষ্যন্তি প্রজাঃ সর্ৱাঃ শোকসন্তাপপীডিতাঃ॥ **5.55.19**॥

তদহং ভাগ্যরহিতো লুপ্তধর্মার্থসঙ্গ্রহঃ।
রোষদোষপরীতাত্মা ৱ্যক্তং লোকৱিনাশনঃ॥ **5.55.20** ॥

ইতি চিন্তযতস্তস্য নিমিত্তান্যুপপেদিরে।
পূর্ৱমপ্যুপলব্ধানি সাক্ষাৎ পুনরচিন্তযৎ॥ **5.55.21** ॥

অথ ৱা চারুসর্ৱাঙ্গী রক্ষিতা স্ৱেন তেজসা।
ন নশিষ্যতি কল্যাণী নাগ্নিরগ্নৌ প্রৱর্ততে॥ **5.55.22** ॥

নহি ধর্মাত্মনস্তস্য ভার্যামমিততেজসঃ।
স্ৱচরিত্রাভিগুপ্তাং তাং স্প্রষ্টুমর্হতি পাৱকঃ॥ **5.55.23** ॥

নূনং রামপ্রভাৱেণ ৱৈদেহ্যাঃ সুকৃতেন চ।
যন্মাং দহনকর্মাযং নাদহদ্ধৱ্যৱাহনঃ॥ **5.55.24** ॥

ত্রযাণাং ভরতাদীনাং ভ্রাতৃণাং দেৱতা চ যা।
রামস্য চ মনঃকান্তা সা কথং ৱিনশিষ্যতি॥ **5.55.25** ॥

যদ্ ৱা দহনকর্মাযং সর্ৱত্র প্রভুরৱ্যযঃ।
ন মে দহতি লাঙ্গূলং কথমার্যাং প্রধক্ষ্যতি॥ **5.55.26** ॥

পুনশ্চাচিন্তযৎ তত্র হনূমান্ ৱিস্মিতস্তদা।
হিরণ্যনাভস্য গিরের্জলমধ্যে প্রদর্শনম্॥ **5.55.27** ॥

তপসা সত্যৱাক্যেন অনন্যৎৱাচ্চ ভর্তরি।
অসৌ ৱিনির্দহেদগ্নিং ন তামগ্নিঃ প্রধক্ষ্যতি॥ **5.55.28** ॥

স তথা চিন্তযংস্তত্র দেৱ্যা ধর্মপরিগ্রহম্।
শুশ্রাৱ হনুমাংস্তত্র চারণানাং মহাত্মনাম্॥ **5.55.29** ॥

অহো খলু কৃতং কর্ম দুর্ৱিগাহং হনূমতা।
অগ্নিং ৱিসৃজতা তীক্ষ্ণং ভীমং রাক্ষসসদ্মনি॥ **5.55.30** ॥

প্রপলাযিতরক্ষঃ স্ত্রীবালৱৃদ্ধসমাকুলা।
জনকোলাহলাধ্মাতা ক্রন্দন্তীৱাদ্রিকন্দরৈঃ॥ **5.55.31** ॥

দগ্ধেযং নগরী লঙ্কা সাট্টপ্রাকারতোরণা।
জানকী ন চ দগ্ধেতি ৱিস্ময়োঽদ্ভুত এৱ নঃ॥ **5.55.32** ॥

ইতি শুশ্রাৱ হনুমান্ ৱাচং তামমৃতোপমাম্।
বভূৱ চাস্য মনসো হর্ষস্তৎকালসম্ভৱঃ॥ **5.55.33** ॥

স নিমিত্তৈশ্চ দৃষ্টার্থৈঃ কারণৈশ্চ মহাগুণৈঃ।
ঋষিৱাক্যৈশ্চ হনুমানভৱৎ প্রীতমানসঃ॥ **5.55.34** ॥

ততঃ কপিঃ প্রাপ্তমনোরথার্থ -
  স্তামক্ষতাং রাজসুতাং ৱিদিৎৱা।
প্রত্যক্ষতস্তাং পুনরেৱ দৃষ্টৱা
  প্রতিপ্রযাণায মতিং চকার॥ **5.55.35** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে পঞ্চপঞ্চাশঃ সর্গঃ ॥